# Parapraveshika

# પરાપ્રવેશિકા

## Document Information

Text title : parApraveshikAkShemarAja

File name : parApraveshikAkShemarAja.itx

Category : shiva, major_works

Location : doc_shiva

Proofread by : Swamini Tattvapriyananda tattvapriya3108 at gmail.com

Latest update : October 20, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 20, 2019

*sanskritdocuments.org*

# પરાપ્રવેશિકા

ૐ નમઃ પરાશક્ત્યૈ ॥

વિશ્વાત્મિકાં તદુત્તીર્ણાં હૃદયં પરમેશિતુઃ ।
પરાદિશક્તિભેદેન સ્ફુરન્તીં સંવિદં નુમઃ ॥ var પરાદિશક્તિરૂપેણ
ઇહ ખલુ પરમેશ્વરઃ પ્રકાશાત્મા પ્રકાશશ્ચ વિમર્શસ્વભાવઃ ॥

વિમર્શો હિ નામ વિશ્વાકારેણ વિશ્વપ્રકાશેન વિશ્વસંહરણેન ચાકૃત્રિમાહમિતિ વિસ્ફુરણમ્ । યદિ નિર્વિમર્શઃ સ્યાદનીશ્વરો જડશ્ચ પ્રસજ્યેત । એષ એવ ચ વિમર્શઃ - ચિચ્ચૈતન્યં સ્વરસોદિતાપરાવાક્સ્વાતન્ત્ર્યં પરમાત્મનો મુખ્યમૈશ્વર્યં કર્તૃત્વં સ્ફુરત્તા સારો હૃદયં સ્પન્દ ઇત્યાદિશબ્દૈરાગમેષૂદ્ઘોષ્યતેઽત એવાકૃત્રિમાહમિતિ-સતત્ત્વમ્ । સ્વયમ્પ્રકાશસ્વરૂપઃ પરમેશ્વરઃ પારમેશ્વર્યાત્ શિવાદિધરણ્યન્તં જગદાત્મના સ્ફુરતિ પ્રકાશતે । એતદેવાસ્ય જનાર્તૃત્વમજડત્વં ચ । જગતશ્ચ કાર્યત્વમઽપ્યેતદધીનપ્રકાશત્વમેવૈવમ્ભૂતં જગત્ પ્રકાશરૂપાત્ કર્તુર્મહેશ્વરાદભિન્નમેવ । ભિન્નત્વે હિ અપ્રકાશમાનત્વેન પ્રકાશનાયોગાદ્ ન કિઞ્ચિત્સ્યાદ્ । અનેન ચ જગતાસ્ય ભગવતઃ પ્રકાશાત્મકં રૂપં ન કદાચિદ્તિરોધીયત એતત્પ્રકાશનેન પ્રતિષ્ઠાં લબ્ધ્વા પ્રકાશમાનમિદં જગદાત્મનઃ પ્રાણભૂતં કથં નિરોદ્ધું શક્નુયાત્ । કથં ચ રૂપં તન્નિરુધ્ય સ્વયમવતિષ્ઠેત । અતશ્ચાસ્ય વસ્તુનઃ સાધકમિદં વાધકમિદં પ્રમાણમિત્યનુસન્ધાનાત્મકસાધકવાધકપ્રમાતૃરૂપતયા ચાસ્ય સદ્ભાવઃ । તત્સદ્ભાવે કિં પ્રમાણમ્ - ઇતિ વસ્તુસદ્ભાવમનુમન્યે । તાદૃક્સ્વભાવવત્વે કિં પ્રમાણમ્ - ઇતિ પ્રષ્ટૃરૂપતયા ચ પૂર્વસિદ્ધસ્ય પરમેશ્વરસ્ય સ્વયમ્પ્રકાશત્વં સર્વસ્ય સ્વસંવેદનસિદ્ધમ્ । કિઞ્ચ પ્રમાણમપિ યમાશ્રિત્ય પ્રમાણં ભવતિ તસ્ય પ્રમાણસ્ય તદધીનશરીરપ્રાણનીલસુખાદિવેદ્યં

ચાતિશય્ય સદા ભાસમાનસ્ય વેદકૈકરૂપસ્ય સર્વપ્રમિતિભાજઃ
સિદ્ધાવભિનવાર્થપ્રકાશસ્ય પ્રમાણવરાકસ્ય કશ્ચોપયોગઃ ।
એવં ચ શબ્દરાશિમયપૂર્ણાનન્તાહન્તાપરામર્શસારત્વાત્
પરમશિવ એવ ષટ્ત્રિંશત્તત્ત્વાનિ । કાનિ ઇત્યાહ ॥

શિવશક્તિસદાશિવેશ્વરશુદ્ધવિદ્યામાયાકલાવિદ્યાકાલનિયતિપુરુષ
પ્રકૃતિમનોબુદ્ધ્યહઙ્કારશ્રોત્રત્વક્ચક્ષુર્જિહ્વાઘ્રાણ-
વાક્પાણિપાદપાયૂપસ્થશબ્દસ્પર્શરૂપરસગન્ધાકાશવાયુવહ્નિસલિલભૂમયઃ
ઇત્યેતાનિ ષટ્ત્રિંશત્ લક્ષણાનિ । તત્ર શિવતત્ત્વં નામ
ઇચ્છાજ્ઞાનક્રિયાત્મકકેવલપૂર્ણાનન્દસ્વભાવરૂપઃ પરમશિવ એવ ॥ ૧॥

અસ્ય જગત્સ્રષ્ટુમિચ્છાપરિગૃહીતવતઃ પરમેશ્વરસ્ય પ્રથમસ્પન્દ
એવેચ્છાશક્તિતત્ત્વમ્ ॥ ૨॥

અપ્રતિહતેચ્છત્વાત સદૈવાઙ્કુરાયમાણમિદં જગત્
સ્વાત્મનાહન્તયાચ્છાદ્યાવસ્થિતં સદાશિવતત્ત્વમ્ ॥ ૩॥

અઙ્કુરિતં જગદિદન્તયાવૃત્યાસ્થિતમીશ્વરતત્ત્વમ્ ॥ ૪॥

અહન્ત્વેદન્તયોરૈક્યસ્વરૂપેષુ ભેદભાવપ્રથા માયા ॥ ૫॥

સ્વસ્વરૂપેષુ ભેદભાવપ્રથા માયા ॥ ૬॥

યદા તુ પરમેશ્વરઃ પારમેશ્વર્યા માયાશક્ત્યા સ્વરૂપં ગૃહયિત્વા
સઙ્કુચિતગ્રાહકતામશ્નુતે તદા પુરુષસંજ્ઞોઽયમેવ માયામોહિતઃ
કર્મબન્ધનઃ સંસારી પરમેશ્વરાદભિન્નોઽપ્યસ્ય મોહઃ પરમેશ્વરસ્ય
ન ભવેત્ । ઇન્દ્રજાલમિવ ઐન્દ્રજાલિકસ્ય સ્વેચ્છયા સમ્પાદિતભ્રાન્તેઃ
ભ્રાન્ત એવ વિદ્યાભિજ્ઞાતૈશ્વર્યસ્તુ ચિદ્ઘનો મુક્તઃ પરમશિવઃ ।
અસ્યૈવ સર્વકર્તૃત્વં સર્વજ્ઞત્વં પૂર્ણત્વં વ્યાપકત્વં
નિત્યત્વં ચ । શક્તયોઽસઙ્કુચિતા અપિ સઙ્કોચગ્રહણેન
કલાવિદ્યારાગકાલનિયતિરૂપતયા ભવન્તિ ॥ ૭॥

તત્ર કલાનામસ્ય પુરુષસ્ય કિઞ્ચિત્કર્તૃત્વહેતુઃ ॥ ૮॥

વિદ્યા કિઞ્ચિજ્જ્ઞત્વકારણમ્ ॥ ૯॥

રાગો વિષયેષ્વભિષ્વઙ્ગઃ ॥ ૧૦॥

કાલો હિ ભાવનાં ભાસનાભાસનાત્મકાનાં ક્રમોઽવચ્છેદકો

ભૂતાદિર્નિયતિર્મમેદં કર્તવ્યમિતિ નિયમનહેતુઃ ॥ ૧૧॥

એતત્પઞ્ચકમસ્ય સ્વરૂપાવરકત્વાત્કઞ્ચુકમિત્યુચ્યતે ।
મહદાદિપૃથિવ્યન્તાનાં તત્ત્વાનાં કારણં મૂલપ્રકૃતિઃ ।
એષા ચ સત્ત્વરજસ્તમસાં સામ્યાવસ્થા । અવિભક્તરૂપં મનઃ
સઙ્કલ્પસાધનાબુદ્ધિઃ નિશ્ચયસાધના અહઙ્કારો નામ -
મમેદં ન મમેદમિત્યભિમાનસાધનમ્ । એતત્ત્રયમન્તઃકરણમ્ ।
શબ્દસ્પર્શરૂપરસગન્ધાત્મકાનાં વિષયાણાં ક્રમેણ સાધનાનિ
શ્રોત્રત્વક્ચક્ષુર્જિહ્વાઘ્રાણાનિ પઞ્ચ જ્ઞાનેન્દ્રિયાણિ ।
વચનાદાનવિહરણવિસર્ગાનન્દાત્મક્રિયાસાધનાનિ
પરિપાઠ્ય વાક્પાણિપાદપાયૂપસ્થાનિ પઞ્ચ કર્મેન્દ્રિયાણિ ।
શબ્દસ્પર્શરૂપરસગન્ધસામાન્યાકારાણિ પઞ્ચતન્માત્રાણિ ।
આકાશમવકાશપ્રદમ્ । વાયુઃ સઞ્જીવનમ્ । અગ્નિર્દાહકઃ પાચકશ્ચ
સલિલમાપ્યાયનં દ્રવરૂપં ચ । ભૂમિર્ધારિકા કઠિનરૂપા ચ । એતત્
સર્વમ્ ।
યથા ન્યગ્રોધબીજસ્થઃ શક્તિરૂપો મહાદ્રુમઃ ।
તથા હૃદયબીજસ્થં જગદેતચ્ચરાચરમ્ ॥

ઇત્યામ્નાયરીત્યા પરાભટ્ટારિકારૂપે હૃદયબીજેઽન્તર્ભૂતમ્ । કથમિત્યાહ
॥ - યથા ઘટશરાવાદીનાં મૃદ્વિકારાણાં પારમાર્થિકં રૂપં મૃદેવ
ભવતિ । યથા વા જલાદિદ્રવજાતીનાં વિચાર્યમાણં વ્યવસ્થિતં રૂપં
જલાદિસામાન્યમેવ ભવતિ તથા પૃથિવ્યાદિમાયાન્તાનાં તત્ત્વાનાં સતત્ત્વં
મીમાંસ્યમાનં સદેવ ભવેદ્, અસ્યાપિ પદસ્ય નિરૂપ્યમાણં સ્વલક્ષણં
ધાત્વર્થવ્યઞ્જકં પ્રત્યયાંશં વિસૃજ્ય પ્રકૃતિમાત્રરૂપં
સાકારમાત્રમ્ એવાવશિષ્યતે । તદન્તર્ગતમેકત્રિંશત્તત્વમ્ । અતઃ પરં
શુદ્ધવિદ્યેશ્વરસદાશિવતત્ત્વાનિ જ્ઞાનક્રિયાસારાણિ । શક્તિવિશેષત્વાત્
ઓઙ્કારેઽભ્યુપગમરૂપે અનુત્તરશક્તિમયે પરમરહસ્યે યેઽન્તર્ભૂતાનિ
। અતઃ પરમૂર્ધ્વાધઃ સૃષ્ટિમયે તુ વિસર્જનીયઃ । એવમ્ભૂતસ્ય
હૃદયબીજસ્ય મહામન્ત્રાત્મકો વિશ્વમયો વિશ્વોત્તીર્ણઃ પરમશિવ
એવોદયવિશ્રાન્તિસ્થાનત્વાન્નિજ સ્વભાવઃ । ઈદૃશં હૃદયં બીજં
તત્ત્વતો યો વેદ સ્વાત્મતયા સમાવિશતિ ચ સ પરમાર્થતો દીક્ષિતઃ
પ્રાણાન્ ધારયન્ લૌકિકવદ્વર્તમાનો જીવન્મુક્ત એવ ભવિષ્યતિ ॥

var જીવન્મુક્ત એવ ભવતિ, દેહપાતે પરશિવભટ્ટારક વે ભવતિ ॥

ઇતિ પરાપ્રવેશિકાકૃતિરિયં ક્ષેમરાજસ્ય ॥

Proofread by Swamini Tattvapriyananda tattvapriya3108 at gmail.com

*Parapraveshika*

pdf was typeset on October 20, 2019

Please send corrections to *sanskrit@cheerful.com*